# 5 - पञ्चम दशकम्
# विराट् पुरुषोत्पत्तिः

व्यक्ता व्यक्त मिदं न किञ्चि दभवत् प्राक् प्राकृत प्रक्षये
मायायाम् गुण साम्य रुद्ध विकृतौ त्वय्-यांगतायां लयम् ।
नो मृत्युश्च तदाऽमृतं च समभूत् नाह्नो न रात्रेस् स्थिति:
तत्रैकस् त्व मशिष्यथा: किल परानन्द प्रकाशात्मना ॥ ॥5-1॥

काल: कर्म गुणाश्च जीव निवहा: विश्वं च कार्यं विभो
चिल्लीला रति मेयुषि त्वयि तदा निर्लीनतां आययु: ।
तेषां नैव वदन्त्य सत्त्व मयि भो: शक्त्यात्मना तिष्ठतां
नो चेत् किं गगन प्रसून सदृशां भूयो भवेत् संभव: ॥ ॥5-2॥

एवं च द्वि परार्ध काल-विगतौ ईक्षां सि-सृक्षा-त्मिकां
बिभ्राणे त्वयि चुक्षुभे त्रिभुवनी भावाय माया स्वयम् ।
मायात: खलु काल-शक्ति रखिलादृष्टं स्वभावोऽपि च
प्रादुर् भूय गुणान् विकास्य विदधुस् तस्यास् सहाय क्रियाम् ॥ ॥5-3॥

माया सन्नि हितोऽ प्रविष्ट वपुषा साक्षीति गीतो भवान्
भेदैस् तां प्रति-बिंबतो विविशिवान् जीवोऽपि नैवापर: ।
कालादि प्रति बोधिताऽथ भवता संचोदिता च स्वयं
माया सा खलु बुद्धि तत्त्व मसृजत् योऽसौ महान् उच्यते ॥ ॥5-4॥

तत्रा सौ त्रिगुणात्म-कोऽपि च महान् सत्त्व प्रधानस् स्वयं
जीवेऽस्मिन् खलु निर्विकल्प महमित् युद्बोध निष्पादक: ।
चक्रेऽस्मिन् सविकल्प बोधक महन् तत्त्वं महान् खल्वसौ
सम्पुष्टं त्रिगुणै स्तमोऽति बहुलं विष्णो भवत् प्रेरणात् ॥ ॥5-5॥

सोऽहं च त्रिगुण क्रमात् त्रिविधतां आसाद्य वैकारिको
भूयस्तैजस तामसा विति भवन् आद्येन सत्त्वात्मना ।
देवानिन्द्रिय मानिनोऽ कृत दिशा वातार्क पाश्-यश्विनो
वह्नीन्द्राच्युत मित्र कान् विधु विधि श्रीरुद्र शारीरकान् ॥ ॥5-6॥

भूमन् मानस बुद्ध्य-हंकृति मिलच् चित्ताख्य वृत्यन्वितं
तच्चान्त: करणं विभो तव बलात् सत्त्वांश एवासृजत् ।
जातस्-तैजसतो दशेन्द्रिय गण: तत्ताम सांशात् पुन:
तन्मात्रं नभसो मरुत् पुरपते शब्दोऽजनि त्वत् बलात् ॥ ॥5-7॥

शब्दाद् व्योम तत: ससर्जिथ विभो स्पर्शं ततो मारुतं
तस्माद् रूप मतो महोऽथ च रसं तोयं च गन्धं महीम् ।
एवं माधव पूर्व पूर्व कलनात् आद्याद्य धर्मान्-वितं
भूत ग्राम मिमं त्वमेव भगवन् प्राकाशयस् तामसात् ॥ ॥5-8॥

एते भूत गणास् तथेन्द्रिय गणा देवाश्च जाता: पृथक्
नो शेकुर् भुवनाण्ड निर्मिति विधौ देवै रमीभिस् तदा ।
त्वं नानाविध सूक्तिभिर् नुत गुण: तत्त्वान्यमू न्याविशन्
चेष्टा शक्ति मुदीर्य तानि घटयन् हैरण्य मण्डं व्यधा: ॥ ॥5-9॥

अण्डं तत्खलु पूर्व सृष्ट सलिलेऽ तिष्ठत् सहस्रं समा:
निर्भिन्दन् नकृथाश् चतुर्दश जगत् रूपं विराडाह् वयम् ।
साहस्रै: कर पाद मूर्ध निवहैर् निश्शेष जीवात्मको
निर्भातोऽसि मरुत् पुराधिप स मां त्रायस्व सर्वामयात् ॥ ॥5-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥